383

॥ श्रीः ॥

शिवहररराजधानीपति-
श्रीराजादेवनन्दनसिंहबहादुरनराधिप-
संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतम्
एकादशं
कुमारिकातन्त्रम् ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-
दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना
मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रालये-
ऽङ्कित्वा प्रकाशितम् ।
(तृतीयावृत्तिः)
संवत् १९६१, शके १८२६.

१८८७सप्तषष्ट्यधिकाष्टादशशततमाख्रिस्ताब्दिक २९
पञ्चविंशतितमराजनियमानुसारतो राजलेखारूढीकरणेन
यन्त्राधिपतिना सर्वथा स्वायत्तीकृतोऽयं ग्रन्थः ।

Printed at the Shri Venkateshwar
Steam Press:—BOMBAY.

उग्रकुमारी पुण्य

॥ श्रीगणेशाय नमः ॥

शाक्तप्रमोदः ।

अथ कुमारीतन्त्रम् ।

अथ कुमारीपूजा ।

रुद्रयामलोत्तरखण्डीयषष्ठपटले ॥ एकदर्ष्षाभवेत्सन्ध्याद्विवर्षा चसरस्वती ॥ त्रिवर्ष्षाचत्रिधामूर्तिश्चतुर्व्वर्ष्षाचकालिका॥ सुभगापञ्चवर्ष्षातुषड्वर्ष्षाचभवेदुमा ॥ सप्तभिर्ब्भैरवीसाक्षादष्टवर्ष्षातुकुब्जिका ॥ नवभिः कालसन्दर्भादशभिश्चापराजिता ॥ एकादशेतुरुद्राणीद्वादशाब्देतुभैरवी ॥ त्रयोदशेमहालक्ष्मीर्द्विसप्तापीठनायिका ॥ क्षेत्रज्ञापञ्चदशभिःषोडशेचाम्बिकामता ॥ एवङ्क्रमेणसङ्कल्प्ययावत्पुष्पन्नजायते ॥ प्रतिपदादिपूर्ण्णान्तँव्वृद्धिभेदेनपूजयेत् ॥ एकवर्ष्षेत्यादिसर्व्वम्बृहन्नीलतन्त्रेऽपि ॥ केवलं षड्वर्षाचउमाभवेत् द्विसप्तानायिकास्मृता षोडशेचाम्बिकामतेति पाठभेदोनामभेदश्चेतिकुब्जिकातन्त्रे ॥ सप्तमपटलेतुविशेष उक्तोयथा ॥ पञ्चवर्ष्षात्समारभ्ययावद्वादशवार्ष्षिकी ॥कुमारी साभवेद्देवीनिजरूपप्रकाशिनी ॥ षड्वर्ष्षाच्चसमारभ्ययावच्चनववार्ष्षिकी ॥ तावच्चैवमहेशानिसाधकाभीष्टसिद्धये॥ अष्टवर्ष्षात्समारभ्य यावत्रयोदशाब्दिकी ॥ कुलजान्ताँव्विजानीयात्तत्रपूजांसमाचरेत् ॥ दशवर्ष्षात्समारभ्ययावत्षोडशवार्ष्षिकी ॥ युवतीन्ताँव्विजानीयादेवतान्ताँव्विचिन्तयेत्॥अन्नँव्वस्त्रन्तथानीरङ्कुमार्य्यैयोददातिहि ॥ अन्नम्मेरुसमन्देविजलञ्चसागरोपमम् ॥ वस्त्रं कोटिसहस्राब्दंशिवलोकेमहीयते ॥ पूजोपकरणानीहकुमार्य्यैयो

ददातिहि ॥ सन्तुष्टादेवतातस्यपुत्रत्वेसानुकल्प्यते ॥ विश्वसारे तु ॥ अष्टवर्ष्यातुसाकन्याभवेद्गौरीवरानने ॥ नववर्ष्यारोहिणीसा दशवर्ष्यातुकन्यका ॥ अतऊर्द्धम्महामायाभवेत्सैवरजस्वला ॥ आरभ्यद्वादशाब्दाच्चयावद्विंशतिसङ्ख्यकम् ॥ सुकुमारीचसाप्रो क्तासर्व्वतन्त्रसमन्विता ॥ यानपाषाणधातूनान्तेजोरूपेणसंस्थि ता ॥ जीवजन्तुषुदेवेशिकिंव्वक्तव्यमतःपरम् ॥ यत्रनास्तिम हामायातत्रकिञ्चिन्नविद्यते ॥ इत्युक्तम् ॥ तत्पूजाफलँय्योगि नीतन्त्रेपूर्व्वखण्डेसप्तदशपटले ॥ कुमारीपूजनफलँव्वक्तुन्नार्हामि सुन्दरि ॥ जिह्वाकोटिसहस्रैस्तुवक्त्रकोटिशतैरपि ॥ तस्मात्ता म्पूजयेद्बालांसर्व्वजातिसमुद्भवाम् ॥ जातिभेदोनकर्त्तव्यःकुमा रीपूजनेशिवे ॥ जातिभेदान्महेशानिनरकान्ननिवर्त्तते ॥ विचि कित्सापरोमन्त्रीध्रुवंसपातकीभवेत् ॥ देवीबुद्ध्यामहाभक्तस्त स्मात्ताम्परिपूजयेत् ॥ सर्वविद्यास्वरूपाहिकुमारीनात्रसंशयः॥ यदिभाग्यवशादेविवेश्याकुलसमुद्भवाम् ॥ कुमारीञ्छंभतेकान्ते सर्व्वस्वेनापिसाधकः ॥ यत्नतःपूजयेत्तान्तुस्वर्ण्णरौप्यादिभिर्म्मुदा ॥ तदातस्यमहासिद्धिर्ज्जायतेनात्रसंशयः ॥ कुमारीपूजा स्थानफलमपितत्रैव ॥ कुमारीपूज्यतेयत्रसदेशःक्षितिपावनः ॥ महापुण्यतमोभूयात्समन्तात्क्रोशपञ्चकम् ॥ यामलेतत्रैव ॥ महापर्व्वसुसर्व्वेषुविशेषाच्चपवित्रके ॥ महानवम्यान्देवेशिकुमारी ञ्चप्रपूजयेत् ॥ तस्मात्षोडशपर्य्यन्तँय्युवतीतिप्रचक्षते ॥ तत्रभा वप्रकाशस्स्यात्सभावःपरमोयुतः ॥ रक्षितव्याःप्रयत्नेनअक्षता स्ताःप्रकारयेत् ॥ महापूजादिकङ्कृत्वावस्त्रालङ्कारभोजनैः ॥ पू जयेन्मन्दभाग्योऽपिलभतेजयमङ्गलम् ॥ अन्येषाङ्कथनेनाथप्र योजनमहाफलम् ॥ विधिनापूजयेद्यस्तुदिव्यवीरपशुस्थितः ॥ भावत्रयेमहासौख्यन्दिव्यकर्म्मणिसत्फलम् ॥ तथा ॥ अनेक

कुलसम्पन्नान्नानाजातिसमुद्भवाम् ॥ अशेषकुलसम्पन्नान्नाना जातिसमुद्भवाम् ॥ नानादेशोद्भवाँव्यापिसगुणाङ्गुणसँय्युताम् ॥ द्वितीयवत्सरादूर्द्ध्वँय्यावत्स्यादष्टमाब्दकम् ॥ तावज्जप्त्वापूज यित्वाकन्यांसुन्दरमोहिनीम् ॥ दिव्यभावस्थितस्साक्षात्तन्त्रम न्त्रफलंलभेत् ॥ कुमारीपूजनादेवकुमारीभोजनादिभिः ॥ एक द्वित्र्यादिबीजानाम्फलदानात्रसंशयः ॥ ताभ्य२पुष्पम्फलन्दत्त्वा अनुलेपादिकन्तथा ॥ बालप्रियञ्चनैवेद्यन्दत्त्वातद्भावभावितः ॥ मृदातदङ्गमात्मानम्बालभावविचेष्टितम् ॥ अतिप्रियकथालाप क्रीडाकौतूहलान्वितः ॥ यथार्त्थतत्प्रियन्तत्रकृत्वासिद्धीश्वरोभ वेत् ॥ कन्यासर्व्वसमृद्धिस्स्यात्कन्यासर्व्वपरन्तपः ॥ होमम्म न्त्रार्च्चनन्नित्यक्रियाकौलिकसत्क्रियाम् ॥ नानाफलमहाधर्म्मङ्कु मारीपूजनँव्विना ॥ तत्तत्कर्म्मफलन्नाथप्राप्नोतिसाधकोत्तमः ॥ फलङ्कोटिगुणँव्वीर२कुमारीपूजयालभेत् ॥ कुसुमाञ्जलिपूर्णा ञ्चकन्यायैकुलपण्डितः ॥ ददातियदितत्पुष्पङ्कोटिमेरुहिरण्यव त् ॥ तद्दानजम्महापुण्यङ्गणादेवसमालभेत् ॥ कुमारीभोजिता येनत्रैलोक्यन्तेनभोजिम् ॥ कालीतन्त्रेएकादशपटले ॥ कु मारीपूजनङ्कुर्य्यात्सर्व्वकर्म्मफलाप्तये ॥ रुद्रयामलेउत्तरखण्डेस प्तमपटले ॥ अथपूजाम्प्रवक्ष्वामिकुमार्य्याअतिदुर्ल्लभाम् ॥ इ त्यभिधाय पूजास्थानंमहापीठन्देवालयमथापिवा ॥ नटीकन्यां हीनकन्यान्तथाकापालिकन्यकाम् ॥ रजकस्यापिकन्याञ्चत थानापितकन्यकाम् ॥ गोपालकन्यकाञ्चैवब्राह्मणस्यापिकन्य काम् ॥ शूद्रकन्याँव्वैद्यकन्यान्तथावैश्यस्यकन्यकाम् ॥ चा ण्डालकन्यकाँव्यापियत्रकुत्राश्रमेस्थिताम् ॥ सुहृद्वर्ग्गस्यकन्या ञ्चसमानीयप्रयत्नतः ॥ पूजयेत्परमानन्दैरात्मध्यानपरायणः ॥ ममपूजाँय्य२करोतिप्रत्यहंशुद्धभक्तितः ॥ तस्यवश्यङ्कुमारीणा

म्पूजनम्भोजनंरवेः ॥ तेजोरूपँव्विधोश्चाग्नेःसर्व्वभावेप्रकाशते ॥ तत्पूजनात्तदालापाद्भोजनादपितच्छुभात् ॥ ममप्रीतिर्भवेत्सा क्षादेवतागुप्तसंस्थिता ॥ बालभैरवदेवस्यकामिनीवदकस्यच ॥ मत्पुत्रस्यसर्व्वलोकपूजितस्यमहौजसः ॥ पूजाभिर्व्विविधैर्द्रव्यै- कुमारीदेवपूजिता ॥ कुमारीदेवताप्रोक्तासर्व्वतोजगदीश्वरी ॥ पू जार्थसर्व्वलोकस्यसमानीयसुरेश्वरीम् ॥ पूजयन्तीम्महादेवीङ्कृत भावनिवासिनीम् ॥ सदाभोजनवाञ्छाढ्यामान्यासन्तुष्टहासिनी ॥ वृथानरौतिसादेवीकुमारीदेवनायिका ॥ सरस्वतीस्वरूपासा पूज्यतेसर्व्वनायकैः ॥ शिवभक्तैर्विष्णुभक्तैस्तथान्यदेवपूजितैः ॥ सर्व्वलोकै- पूजितासाचावश्यम्पूज्यतेबुधैः ॥ पूजयालभतेपुत्रान्पू जयालभतेश्रियम् ॥ पूजयाधनमाप्नोतिपूजयालभतेमहीम् ॥ पू जयालभतेलक्ष्मींसरस्वतीम्महौजसम् ॥ महाविद्या- प्रसीदन्ति सर्व्वेदेवानसंशयः ॥ कालभैरवब्रह्मेन्द्रब्राह्मणाब्रह्मवेदिनः ॥ रुद्र श्चदेववर्गाश्चवैष्णवाब्रह्मरूपिणः ॥ अवताराश्चद्विभुजावैष्ण वामनुशोभिताः ॥ अन्येदिक्पालदेवाश्चचराचरगुरुस्तथा ॥ ना नाविद्याश्रिताःसर्व्वेदानवा- कूटशालिनः ॥उपसर्गास्थितायेयेते तेतुष्टानसंशयः ॥ यद्यहंशुद्धरूपाहिअन्यलोकेचकाकथा ॥ कु मारीपूजनङ्कृत्वात्रैलोक्यव्वँशमानयेत् ॥ महाकान्तिर्भवेत्क्षिप्रं सर्व्वपुण्यफलप्रदम् ॥ बृहन्नीलतन्त्रे ॥ महाभयातिदुर्भिक्षाद्यु त्पातानिकुलेश्वरी॥ दुःस्वप्नभयमृत्युञ्चयेचान्येचसमुद्भवाः ॥ कु मारीपूजनादेवनतेचप्रभवन्तिहि ॥ नित्यङ्क्रमेणदेवेशिपूजयेद्वि धिपूर्व्वकम् ॥ घ्नन्तिविघ्नान्पूजिताश्चभयंशत्रून्महोत्कटान् ॥ ग्रहारोगा- क्षयँय्यान्तिभूतवेतालपन्नगाः ॥ रुद्रयामलेयथा ॥ त त्तन्मन्त्रेसमुल्लेख्यात्क्षणात्पुण्यायुतङ्भेत् ॥ मन्त्रेणपुटितङ्कृत्वा जप्त्वासिद्धीश्वरोभवेत् ॥ यद्यत्प्रकारमुद्दिश्यवदामिसुरसुन्दरि॥

तत्तत्कार्य्यमवश्यञ्चभिन्नबुद्धिन्नकारयेत् ॥ तथा ॥ शृणुनाथकु लार्त्थम्मेकुमारीपूजनेमनुम् ॥ महाविद्यामहामन्त्रंसिद्धिमन्त्रन्न संशयः ॥ एतन्मन्त्रप्रभावेणजीवन्मुक्तोभवेत्सुधीः ॥ अतिदेवि पदँय्यातिसत्यमानन्दभैरव ॥ ऐहिकेसुखसम्पत्तिर्म्मधुमत्याः प्र सादतः ॥ अवश्यम्प्राप्नुयान्मर्त्योंविश्रामङ्कुरुशङ्कर ॥ वाग्भवे नवपुरःक्षोभम्मायावीजेगुणाष्टकम्॥श्रियोवीजेश्रियोलाभोमाया बीजेरिपुक्षयः ॥ भैरवेणतुवीजेनखेचरत्वंसुरादिभिः॥ कुमारि कान्ह्यदन्नाथसदात्वंहिकुमारकः ॥ शतमष्टोतराँव्वापिएकाँव्वाप रिपूजयेत् ॥ पूजिताःपरिपूज्यन्तेह्यवघ्नन्त्यवमानिताः॥कुमारी योगिनीसाक्षात्कुमारीपरदेवता ॥ असुरादुष्टनागाश्चयेयेदुष्ट ग्रहाअपि ॥ भूतवेतालगन्धर्व्वाडाकिनीयक्षराक्षसाः॥याश्चान्या देवतास्सर्व्वाभूर्भुवस्स्वश्चभैरवाः ॥ पृथिव्यादीनिसर्व्वाणिब्रह्मा ण्डेसचराचरम् ॥ ब्रह्माविष्णुश्चरुद्रश्चर्ईश्वरश्चसदाशिवः ॥ तन्तु ष्टाःसर्व्वतुष्टाश्चयस्तुकन्याम्प्रपूजयेत् ॥ विधियुक्ताङ्कुमारीन्तु भोजयेच्चैवभैरव ॥ पाद्यार्घ्यञ्चतथाधूपङ्कुङ्कुमञ्चन्दनंशुभम् ॥ भक्तिभावेनसम्पूज्यकुमारीभ्योनिवेदयेत् ॥

॥ कुमारीपूजाक्रमः ॥

तथा ॥ आनीयसुन्दरीन्नारींङ्कुमारींव्वरनायिकाम् ॥ रत्नाल ङ्कारसँय्युक्तांशङ्खवस्त्रादिशोभिताम् ॥ वाग्भवेनजलन्नाथतन्ना म्नापरिदापयेत् ॥ देवीबुद्ध्यासदाध्यात्वापूजयेत्साधकोत्तमः ॥ मायावीजेनतन्नाम्नापाद्यन्दद्यात्तथाप्रभो ॥ लक्ष्मीवीजेनचार्घ्य न्तुकूर्च्चेजेनचचन्दनम् ॥ मायावीजेनपुष्पाणिकुमार्य्यैदापयेत्सु धीः ॥ सदाशिवेनमन्त्रेणधूपदीपौमहत्तमौ ॥ दत्वाषडङ्गमन्त्रेण पूजयेद्देवनायक ॥ तत्प्रकारम्महादेवशृणुष्वानन्दरूपधृक ॥ म

हातेजोमयंशुभ्रंहृदयंहस्तदक्षिणैः ॥ विभाव्यप्रपठेद्भक्त्यातन्म न्त्रंशृणुशङ्कर ॥ आदौवाग्भवमुच्चार्य्यमायाँल्लक्ष्मीञ्चकूर्च्चकम् ॥ प्रेतबीजन्ततोब्रूयात्सविसर्गेन्दुकीलकम् ॥ कुलशब्दंसमुच्चार्य्यकुमारिकेततोवदेत् ॥ हृदयायनमःप्रोच्यततःशिरसिभावयेत् ॥ शुक्लवर्णंसर्व्वमयम्बीजमुच्चार्य्यसन्न्यसेत्॥हकारँव्वाग्भवाद्यञ्चवकारँव्वाग्भवात्मकम् ॥मायाँल्लक्ष्मीव्वाँग्भवञ्चद्विठान्तंशिरसेपदम् ॥ वह्निजायावधिर्म्मन्त्रोन्यसेच्छिरसिसाधकः ॥ शिखामध्येकृष्णवर्णंन्नीलाञ्जनचयप्रभम् ॥ विभाव्यसन्न्यसेन्मन्त्रीकुमारीकुलसिद्धये ॥ आदौप्रणवमुद्धृत्यतदन्तेविष्णुसुन्दरीम् ॥ शिखायैपदमुद्धृत्यवषट्कारन्ततोवदेत् ॥ ततःकवचमध्येचवलवन्तंसुतेजसम् ॥प्रथमारुणसङ्काशन्ध्यात्वाचारुकलेवरम्॥वाग्भवञ्चसमुच्चार्य्यकुलशब्दन्ततोवदेत् ॥ वागीश्वरिपदम्पश्चात्कवचायततोवदेत्॥तारकम्ब्रह्मशब्दञ्चकवचन्यासजालकम् ॥ततोनेत्रत्रयेध्यात्वामहाबीजम्महाप्रभम् ॥ रक्तवर्णङ्कोटिकोटिजवामण्डलमण्डितम् ॥विराजितङ्कोटिपुण्यार्ज्जितंतेजसिभास्करे ॥ वाग्भवंहिसमुच्चार्य्यकुलेश्वरिपदन्ततः ॥ नेत्रत्रयायशब्दान्तेवौषड्लोचनमन्त्रकम् ॥ ततस्साधकमन्त्रीचवामहस्ततलेतथा ॥ मध्यमातर्ज्जनीभ्याञ्चतालद्वयमुपाचरेत् ॥ तन्मत्रङ्कोटिसूर्य्योग्रज्योत्स्नाजालसमप्रभम् ॥ महाकाशोद्भवंशब्दमहोग्रपरिपीडनम् ॥ मायाबीजन्तथास्त्रायपदमुद्धृत्यययत्नतः ॥ फडन्तेचान्तमुद्धृत्यमहामन्त्रम्प्रकीर्तितम् ॥ ततस्तस्याःकुण्डविलेध्यात्वाचपरिवारकान् ॥ पूजयेद्यत्नतोमन्त्रीतेजसामृतधारया ॥ तर्प्पयेत्पूजयेद्भक्त्याभैरवम्बालभैरवम् ॥ देवताभिःपूजयित्वापरिवारान्क्रमेणतु ॥ ततोवाग्भवमुच्चार्य्यसिद्धजायायशब्दतः ॥ पूर्व्वम्पदंसमुच्चार्य्यवक्त्रायनमईरितम् ॥ ततोवाग्भवमुच्चार्य्यजया

यशब्दमुद्धरेत् ॥ उत्तरेवक्त्रमुद्धृत्यचतुर्थ्यन्तन्नम ः पदम् ॥ तता वाग्भवमायाश्रीबीजमुच्चार्य्ययत्नतः ॥ कुब्जिकेपश्चिमान्तेचवक्त्रा यनमईरिताम् ॥ ततोवाग्भवमुच्चार्य्यकालिकेपदमुच्चरेत् ॥ दक्ष वक्त्रायशब्दान्तेनमोमन्त्रम्प्रकीर्तितम् ॥ एतन्मन्त्राक्षरान्नाथस मुच्चार्य्यकुलेश्वर ॥ पूजयित्वाक्रमेणैवभास्करम्परिपूजयेत् ॥ च ण्डन्दिक्पालदेवञ्चसन्ध्यादीन्परिपूजयेत् ॥ वीरभद्राम्महाकन्या ङ्कौलिनीङ्कुलगामिनीम् ॥ अष्टादशभुजाङ्कालीञ्चण्डदुर्ग्गा म्प्रपूजयेत् ॥ नैवेद्यादीन्समानीयनानाभक्त्यानुराजितम् ॥ दु ग्धङ्घनावृतङ्क्षीरम्पक्वान्नम्पक्वसम्फलम् ॥ यद्यत्कालोपयोग्य ञ्चसर्वदामधुमिश्रितम् ॥ पञ्चतत्त्वङ्कुलद्रव्यन्निजकल्याणवर्द्धन म्॥ नानाद्रव्यञ्चनैवेद्यंस्वस्वकल्पोक्तसाधितम् ॥ कुमारीभ्यो निवेद्यैवन्नानासौरभशोभितम् ॥ शीतलञ्जलमानीयदद्यात्ताभ्यो महासुधीः ॥ ततोहितम्महामन्त्रङ्कुमार्य्याश्चातिदुर्ल्लभम् ॥ अथवाग्मीसमूलञ्चजप्त्वासिद्धीश्वरोभवेत् ॥ समर्प्यप्राणवायूना न्धारणङ्कारयेत्स्वयम् ॥ अष्टाङ्गादिप्रमाणञ्चकुर्व्वन्स्तोत्र म्पठेन्नमेत् ॥ प्रणाममन्त्रोपितत्रैव ॥ नमामिकुलकामिनीम्परम भाग्यसन्दायिनीङ्कुमाररतिचातुरींसकलसिद्धिमानन्दिनीम् ॥ प्रवालगुटिकास्रजंरजतरागवस्त्रान्वितां हिरण्यतुलभूषणाम्भुवन वाङ्कुमारीम्भजे ॥ इतिमन्त्रेणसन्नम्यतारिणीम्परिपूजयेत् ॥ शिवाङ्गणेशंसम्पूज्यप्रणमेत्साधकोत्तमः ॥ दक्षिणाँव्विधिवद्द त्वाकुमारीभ्य ःक्रमेणतु ॥ विवाहयेत्स्वयङ्कन्याम्ब्रह्महत्यावि नश्यति ॥ योयश्चपुण्यकालेतुकन्यादानंसमापयेत् ॥ भूमि मुक्तिफलन्तस्यसौभाग्यंसर्व्वसम्पदः ॥ रुद्रलोकेवसेन्नित्यन्त्रि नेत्रोभगवान्हरः ॥ तीर्थकोटिसहस्राणिअश्वमेधशतानिच ॥ त त्फलँल्लभतेमर्त्योयस्तुकन्याँव्विवाहयेत् ॥ वालुकासागरेज्ञेया

स्तावदद्भसहस्रकम्॥एकैकङ्कलमुद्धृत्यरुद्रलोकेमहीयते॥ तत्तदि ष्टदेवताया ५प्रीतयेतुष्टयेसुधीः कन्यादानंसमाहृत्यमुक्तिमाप्नो तिभैरव ॥ तत्तद्वितीयकन्यायास्तत्तद्वुद्ध्याचसाधकः ॥ विभा व्यशिवरूपत्वंसम्प्रदानीयकन्यके ॥ पूर्णरूपंशिवन्ध्यात्वावरंस र्वाङ्गसुन्दरम्॥तेजोमयय्यँश ५कान्तङ्कालभैरवरूपिणम् ॥ वटुके शम्महादेवव्वँरयेत्साधकाग्रणीः॥बालरूपाञ्चत्रैलोक्यसुन्दरीव्वँर वर्ण्णिनीम्॥नानालङ्कारनम्राङ्गीम्भद्रविद्याप्रकाशिनीम् ॥ चारु हास्याम्महानन्दहृदयांशुभदांशुभाम् ॥ ध्यात्वाद्वादशपत्राब्जेपू र्णचन्द्रनिभाननाम्॥सम्प्रदानंसमानीयतत्तन्मन्त्रेणदापयेत् ॥

॥ इतिकुमारीदानक्रमफलम् ॥

॥ अथकुमारीमन्त्रपुरश्चरणम् ॥

अष्टमपटले ॥ अथवक्ष्येमहादेव्या ५कुमार्य्याजपहोमकः॥ लक्ष सङ्ख्यञ्जपङ्कृत्वामायाव्वँवाग्भवम्मनुम् ॥ कालीवीजँव्वापि नाथअथवाकामबीजकम् ॥ सदाशिवेनपुटितम्बिन्दुचन्द्रविभूषि तम् ॥ अथवाप्रणवेनापिपुटितन्त्रिदशेश्वर ॥ तद्दशांशेनजुहुया द्घृताक्तविल्वपत्रकैः॥ अथवाश्वेतपुष्पैश्चकुन्दपुष्पैर्म्महाफलम्॥ एवङ्क्रमेणजुहुयात्करवीरप्रसूनकैः ॥ घृताक्तै ५केवलैर्व्वापिच न्दनागरुमिश्रितैः ॥ हविष्याशीदिवाभागेरात्रौपूजापरोभवेत् ॥ निजपूजामशेषैस्तुकुलद्रव्यै ५प्रपूजयेत् ॥ रविसंख्यञ्जपेत्तत्रपर मानन्दरूपधृक् ॥ जपान्तेजुहुयान्मन्त्रीमदुक्तद्रव्यसँय्युतैः ॥ तत ५प्राणात्मकँव्वायुंशोधयित्वापुन ५पुनः ॥ प्राणायामत्रयङ्कृ त्वा चाष्टाङ्गै ५प्रणमेन्मुदा ॥ प्रणामसमयेनाथइदंस्तोत्रम्पठेद्य दि॥ कवचञ्चतथापाठ्यङ्कुमारीणामथापिवा॥निजदेव्यामहास्तो त्रम्पीठाङ्गङ्कवचन्ततः॥ कुमारीणामहन्देवसहस्रन्नामसाष्टकम्॥

पठित्वासिद्धिमाप्नोतिनात्रकार्य्याविचारणा ॥ तदशक्तौनि
जदेव्यास्सहस्रंनाममङ्गलम् ॥ अष्टोत्तरम्पठेन्नाथसिद्ध्याकाङ्क्षी
नसंशयः॥तासांस्तोत्रन्दिव्यनाथशृणुसर्व्वत्रमङ्गलम् ॥ अकस्मा
त्सिद्धिमाप्नोतिपठित्वासाधकोत्तमः ॥ अग्रेसंस्थाप्यतास्सर्व्वार
ब्रकोटिसुशीतलाः ॥ ततःस्तोत्रम्पठेद्धीमान्समाहितमनावशी ॥
महादिव्याचाररतोवीरभावोल्बणोऽपिवा ॥ एवङ्क्रमेणप्रपठेद्भक्ति
भावपरायणः ॥ महाविद्यामहासेवाभक्तिश्रद्धाश्रुतार्प्पितः ॥ म
हाज्ञानीभवेत्क्षिप्रंवाञ्छासिद्धिमवाप्नुयात् ॥

अथकुमारीपूजाप्रयोगः ।

तत्रएकवर्ष्षावधिषोडशवर्ष्षपर्य्यन्तमजातपुष्पाकुमारीस
ञ्ज्ञातत्रवर्ष्षक्रमेणनामानियथा ॥सन्ध्यासरस्वतीत्रिधामूर्त्तिःका
लिका सुभगा उमा॥मालिनी कुब्जिका कालसन्दर्भाअपराजि
ता॥रुद्राणी भैरवीमहालक्ष्मी२पीठनायिका क्षेत्रज्ञा अम्बिका प्रति
पदादिपञ्चदश्यन्तंवृद्धिक्रमेणपूजनीयाः ॥कुमारीतुसर्वजातीयैव
पूज्या॥ प्रशस्तानटीकन्याकापालिकाकन्यारजककन्यानापित
कन्यागोपालककन्याब्राह्मणकन्याशूद्रकन्यावैद्यकन्यावणिक्क
न्याचाण्डालकन्यासुहृद्वर्गकन्याः ॥ कुमारीमासनेसमुपवेश्य
ध्यायेद्यथा ॥ बालरूपाञ्चत्रैलोक्यसुन्दरीन्वरवर्ण्णिनीम् ॥नाना
लङ्कारनम्राङ्गीम्भद्रविद्याप्रकाशिनीम् ॥ चारुहास्याम्महानन्द
हृदयांशुभदांशुभाम् ॥ एवन्ध्यात्वात्मशिरसिपुष्पन्दत्वामानसो
पचारेणसम्पूज्यपुनर्द्ध्यात्वाकुमार्य्यङ्गेदत्वाइदमासनम्ऐंह्रींश्रीं
ह्रूँह्लौंः सन्ध्यायैकुमार्य्यैनमः एवम्पूर्व्ववीजान्युच्चार्यसरस्वत्यैकु
मार्य्यैनमइत्यादिवत्सरानुक्रमेणचतुर्थ्यन्तेननाम्नाआसनादिभिः
षोडशभिरुपचारैःसम्पूजयेत्॥एतज्जलंम्ऐंसन्ध्यायैनमःएतत्पाद्यं

ह्रींसन्ध्यायैनमः एतदाभरणंश्रींसरस्वत्यैएषगन्धःहूँसन्ध्यायैनम एतानि पुष्पाणिह्लौंसन्ध्यायैनमःएषधूपःऐंसन्ध्यायैनमःएषदीपःह्रींसन्ध्यायैएतन्नैवेद्यम्ऐंह्रींश्रींहूँह्लौंःसन्ध्यायैनिवेदयामिशङ्खमाल्यकज्जलकुङ्कुमादिकमनेननमोन्तेनमन्त्रेणदेयम् ॥ सर्व्वत्रच तुर्थ्यन्तङ्कुमार्य्यैइतिविशेषणन्दातव्यम् ॥ ततःषडङ्गपूजा ॥ तत्र क्रमस्तुकुमार्य्याहृदयन्दक्षिणहस्तेनधृत्वामहातेजोमयंशुक्लवर्णं ध्विभाव्यऐंह्रींश्रींहूँह्लौंःकुलकुमारिकेहृदयायनमःशिरःशुक्लवर्णं सर्व्वमयँध्विभाव्यहैंह्रींश्रींऐंशिरसेस्वाहाशिखान्नीलाञ्जनप्रभाँध्वि भाव्य ॐश्रींशिखायैवषट् कवचम्प्रथमारुणसङ्काशंसुतेजस्कँध्वि भाव्यऐंकुलवागीश्वरिकवचायहूम्ततोनेत्रत्रयंसर्व्वबीजमयम्महा प्रभंरक्तवर्णङ्कोटिजवापुष्पोज्ज्वलँध्विभाव्यऐंकुलेश्वरिनेत्रत्रयाय वौषट् ह्रींअस्त्रायफडितिवामहस्ततलेतर्ज्जनीमध्यमाभ्यान्तालद्वयन्दद्यात् ॥ ततस्तस्याऽकुण्डबिलेसपरिवारम्बालभैरवन्ध्यात्वाएतेगन्धपुष्पेसपरिवारबालभैरवायनम इतिपूजयेत् एतेगन्धपुष्पेऐंसिद्धजयायपूर्ववक्त्रायनमः एवञ्जयायोत्तरवक्त्राय० ऐंह्रीं श्रींकुब्जिकेपश्चिमवक्त्राय० ऐंकालिकेदक्षिणवक्त्राय० ॐभास्करायप्रत्येकन्दिक्पालेभ्यःवीरभद्रायै० महाकन्यायै० कौलिन्यै० कुलगामिन्यै० अष्टादशभुजायै० काल्यै० चण्डदुर्ग्गायै० ओङ्कारादिनमोऽन्तेनपूजयेत् ॥ततऽकुमारीमूलमन्त्रंस्वीयमन्त्रञ्वा यथाशक्तिजप्त्वाप्राणायामङ्कृत्वाजपंसमर्प्य स्तवकवचादिकम्प ठित्वा अष्टाङ्गम्पञ्चाङ्गञ्वाप्रणम्यदक्षिणान्दद्यात् ॥ इतिकुमारी पूजाप्रयोगः ॥

अथ कुमारीतर्प्पणम् ।

शृणुनाथप्रवक्ष्यामिकुमारीतर्प्पणादिकम् ॥ यासान्तर्प्पण मात्रेणकुलसिद्धिर्भवेद्ध्रुवम् ॥ १ ॥ कुलबालाम्मूलपद्मास्थिता

ङ्गामविहारिणीम् ॥ शतधामूलमन्त्रेणतर्प्पयामितवप्रिये ॥ २ ॥ मूलपङ्कजयोगाङ्गीङ्कमारींश्रीसरस्वतीम् ॥ तर्प्पयामिकुलद्रव्यै स्तवसन्तोषहेतुना ॥ ३ ॥ चारुमूलाधारपद्मेषड्दलान्त ःप्रकाशिनीम् ॥ श्रीबीजेनतर्प्पयामिभोगमोक्षायकेवलम् ॥ ४ ॥ स्वाधिष्ठानकलोल्लासविष्णुसङ्केतगामिनीम् ॥ कालिकान्निजबीजेनतर्प्पयामिकुलामृतैः ॥ ५ ॥ स्वाधिष्टानाख्यपद्मस्थाम्महातेजोमयींशिवाम् ॥ सूर्य्याणांशीर्ष्षमधुनातर्प्पयामिकुलेश्वरीम् ॥ ६ ॥ मणिपूराजमध्येषुमनोहरकलेवराम् ॥ उमांदेवीन्तर्प्पयामिमायाबीजेनपार्व्वतीम् ॥ ७ ॥ मणिपूराम्भोजमध्येत्रैलोक्यपरपूजिताम् ॥ मानिनीम्मलचित्तस्यसद्बुद्धिस्तर्प्पयाम्यहम् ॥ ८ ॥ मणिपूरस्थितांरौद्रीम्परमानन्दवर्द्धिनीम् ॥ आकाशगामिनीन्देवीङ्कञ्जिकान्तर्प्पयाम्यहम् ॥ ९ ॥ तर्प्पयामिमहादेवीम्मन्त्रसाधनतत्पराम् ॥योगिनीङ्कालसन्दर्भान्तर्प्पयामिकुलाननाम् ॥ १० ॥ शक्तिमन्त्रप्रदांरौद्रीङ्कोलजिह्वासमाकुलाम् ॥ अपराजिताम्महादेवीन्तर्प्पयामिकुलेश्वरीम् ॥ ११ ॥ महाकौलप्रियांसिद्धांरुद्रलोकसुखप्रदाम् ॥ रुद्राणींरुद्रकिरणान्तर्प्पयामिमधुप्रियाम् ॥ १२ ॥ षोडशस्वरसंसिद्धिम्महारौरवनाशिनीम् ॥ महामद्यपानचित्ताम्भैरवीन्तर्प्पयाम्यहम् ॥१३ ॥ त्रैलोक्यवरदान्देवींश्रीबीजमालयावृताम् ॥ महालक्ष्मीम्भवैश्वर्य्यान्तर्प्पयाम्यहमम्बिके ॥ १४ ॥ लोकानांहितकर्त्रींश्चहिताहितजनप्रियाम् ॥ तर्प्पयामिरमाबीजपीठाद्यम्पीठनायिकाम् ॥ १५ ॥ जयन्तींव्वेदवेदाङ्गमातरंसूर्य्यमातरम् ॥ तर्प्पयामिसुधाभिश्चक्षेत्रज्ञाम्मायया वृताम् ॥ १६ ॥ तर्प्पयामिकुलानन्दपारगाम्परमाननाम् ॥ तर्प्पयाम्यम्बिकान्देवीम्मायालक्ष्मींह्रदिस्थिताम् ॥ १७ ॥ सर्व्वासाञ्चरणद्वयाम्बुजतलश्चैतन्य

विद्यावतांसौख्यार्थंशुभषोडशस्मरयुतांश्रीषोडशीम्मङ्गलाम् ॥ आनन्दार्ण्णवपद्मरागखचितेसिंहासनेशोभिते त्वान्नित्यम्परित र्प्पयामिसकलंश्वेताब्जमध्यासने ॥ १८ ॥ येनित्यंसुप्रतिष्ठि तश्चसकलस्तोत्राङ्गसन्तर्प्पणव्विँद्यादाननिदानमोक्षपरमम्माया मयय्यँान्तिते ॥ नोसन्तिक्षितिमण्डलेष्वरिगणास्सर्व्वेविपत्कार काराजानव्वँशयन्तियोगसकलन्नित्याभवन्तिक्षणात् ॥ १९ ॥ तर्प्पणात्मकमोक्षाख्यम्पठतेयदिमानुषः ॥ अष्टैश्वर्य्ययुतोभूत्वा वत्सरान्माम्प्रपश्यति ॥ २० ॥ महायोगीभवेन्नाथमासादभ्यास त×प्रभो॥ त्रैलोक्यङ्क्षोभयेत्क्षिप्रव्वाञ्छाफलमवाप्नुयात्॥२१॥ य×पठेदेकभावेनसतर्प्पणफलङ्लँभेत् ॥ पूजाफलमवाप्नोतिकुमा रीस्तोत्रपाठतः ॥ २२ ॥ योनकुर्य्यात्कुमार्य्यर्च्चाःस्तोत्रञ्चनित्य मङ्गलम् ॥ सभवेत्पाशव×कल्पोमृत्युस्तस्यपदेपदे ॥ २३ ॥ इतिरुद्रयामलेउत्तरखण्डेमहातन्त्रोद्दीपनेकुमार्य्युपचर्य्याविन्या सेसिद्धमन्त्रप्रकरणेदिव्यभावनिर्ण्णयभैरवीसँव्वादेकुमारीतर्प्प णात्मकस्तोत्रंसमाप्तम् ॥ ॥ छ ॥ ॥

अथ कुमारीस्तोत्रम् ।

भैरवउवाच ॥ देवेन्द्रोदयइन्दुकोटिकिरणाव्वाराणसीवासि नींव्विद्याव्वाग्भवकामिनीन्त्रिनयनांसूक्ष्मक्रियागामिनीम् ॥ च ण्डोद्वेगनिकृन्तनीन्त्रिजगतान्धात्रीङ्कुमारीव्वँराम्मूलाम्भोरुहवा सिनींशशिमुखींसम्पूजयन्तिश्रिये ॥ १॥भाव्यान्देवगणैःशिवेन्द्र यतिभिर्म्मोक्षार्थिभिर्ब्बालिकांसन्ध्यान्नित्यगुणोदयान्द्विजगण श्रेष्ठोदयांशारुहाम् ॥ शुक्लाभाम्परमेश्वरींशुभकरीम्भद्राँव्वि शालाननाङ्गायत्रीङ्गणमातरन्दिनपतिङ्कुप्णाञ्चवृद्धाम्भजे॥ २ ॥ बालाम्बालकपूजिताङ्घ्रियुताँव्विद्यावताम्मोक्षदान्धात्रींशुक्लसर

स्त्रतीन्नरवराव्वाग्वादिनीश्चण्डिकाम् ॥ स्वाधिष्ठानहरप्रियाम्प्रियकरींव्वेदान्तविद्याप्रदान्नित्यम्मोक्षहितायोगवपुषाचैतन्यरूपाम्भजे ॥ ३ ॥ नानारत्नसमूहनिर्म्मितगृहेपूज्यांसुरैर्ब्बालिकाव्वन्देनन्दनकाननेमनसिसिद्धान्तैकवीजानने॥अर्थदेहिनिरर्थकायवपुषेहित्वाकुमारीङ्कलां मह्यम्मातृकुमारिकेचत्रिविधामूर्त्त्याचतेजोमयीं ॥४॥ हालाहालकरालिकाङ्कलपथोल्लासैःकराब्जोद्वहान्नासामोदकरालिनींहिभजताङ्कामातिरिक्तप्रदाम् ॥ बालोहम्बटुकेश्वरस्यचरणाम्भोजाश्रितोऽहंसदा हित्वाबालकुमारिकेशिरसिशुक्लाम्भोरुहेसम्भजे ॥ ५ ॥ सूर्य्याह्लादबलाकिनीङ्कलिमहापापार्द्दितापापहान्तेजोगाम्भुविसूर्य्यगाम्भयहरान्तेजोमयीङ्कालिकाम् ॥ वन्देहृत्कमलेसदाविदलेबालेन्द्रविद्यांसतींसाक्षात्सिद्धिकरीङ्कमारिविमलेत्वामाद्यरूपेश्वरीम्॥ ६॥ नित्यंश्रीकुलकामिनीङ्कलवतीङ्कौलासुनामम्बिकान्नानायोगविलासिनींसुरमणीन्नित्यान्तपस्यान्विताम् ॥वेदान्तार्त्थविशेषदेशवसनाभाषाविशेषस्थिताव्वन्देपर्व्वतराजराजतनयाङ्कालप्रियेत्वामहम्॥७॥कौमारीङ्कलमालिनींरिपुगणक्षोभाग्निसन्दायिनींरक्ताभानयनांशुभाम्परममार्ग्गाम्मुक्तिसञ्ज्ञाप्रदाम् ॥भार्य्याम्भोगवतीम्पतिन्त्रिभुवनेष्वामोदपञ्चाननाम्पञ्चास्यप्रियकामिनीम्भयहरांसर्प्पांदिहाराम्भजे ॥ ८ ॥ चन्द्रास्याञ्चरणद्वयाभुजमहाशोभाविनोदीन्नदीम्मोहादिक्षयकारिणीव्वरकरांश्रीकुब्जिकांसुन्दरीम्॥ येनित्यम्परिपूजयन्तिसहसाराजेन्द्रचूडामणिसम्पत्तिन्धनमायुषन्त्रिजगताव्व्याप्येश्वरत्वञ्जगुः॥९॥योगीशम्भुवनेश्वरम्प्रियकरंश्रीकालसन्दर्भया शोभासागरगामिनंसुरतरुव्वाञ्छाफलोद्दीपनम् ॥ लोकानामघनाशनायशिवयाश्रीसञ्ज्ञयाविद्यया धर्म्मप्राणसदैवतम्प्रणमताङ्कल्पद्रुमम्भावये ॥ १० ॥ विद्यान्तामपराजि

ताम्मदनगामामोदमत्ताननांहृत्पद्मस्थितपादुकाङ्कुलकलाङ्का
त्यायनीम्भैरवीम् ॥ येयेपुण्यधियोभजन्तिपरमानन्दाब्धिम
ध्येमुदा सर्व्वाच्छादिततेजसाभयकरीम्मोक्षायसत्कीर्त्तये॥ ११ ॥
रुद्राणीम्प्रणमामिपद्मवदनाङ्कोत्यर्कतेजोमयीम्नानालङ्कृतभूषणा
ङ्कुलभुजामानन्दसन्दायिनीम् ॥ श्रीमायाकमलान्वितां
हृदिगतांसन्तानबीजक्रियाँव्वन्देवाग्भवरूपिणीङ्कुलवधूंहूंकार
बीजोद्भवाम् ॥ १२ ॥ नमामिवरभैरवीङ्क्षितितलाघकालानना
म्मृणालकुसुमारुणाम्भुवनदोषसंशोधिनीम् ॥ जगद्भयहरा
म्परान्त्वरति या च योगेश्वरींममापदसहस्रकंसकलभोगदा
न्तामहम् ॥ १३ ॥ साम्राज्यम्प्रददातिया भगवतीविद्याम
हालक्षणासाक्षादष्टसमृद्धिदाम्भुविमहालक्ष्मी×कुलक्षोभहा॥ स्वा
धिष्ठानसुपङ्कजेविवसिताँव्विष्णोरनन्तश्रिये वन्देराजपदप्रदांशु
भकरीङ्कौलेश्वरींसर्व्वदा ॥ १४ ॥ पीठानामधिपाधिपामसुरहाँ
व्विद्यांशुभान्नायिकां सर्व्वालङ्करणान्वितान्त्रिजगताङ्क्षोभापहा
व्वँारुणीम् ॥ वन्देपीठगनायिकान्त्रिभुवनच्छायाभिराच्छादितां
सर्व्वेषांहितकारिणीञ्जयवतामानन्दरूपेश्वरीम् ॥ १५ ॥ क्षेत्र
ज्ञाम्मदविह्वलाङ्कुलवतींसिद्धप्रियाम्श्रेयसीं शम्भोश्श्रीबटुकेश्वर
स्यमहतामानन्दसञ्चारिणीम् ॥ साक्षादात्मपरोद्गमान्निजमन×
क्षोभापहांशाकिनीव्वाँक्यार्त्थप्रकटामहंरजतभाव्वन्देमहाभैरवी
म् ॥ १६ ॥ सम्पूर्णविधुवन्मुखीङ्कमलमध्यसम्भाविनींशि
रोदशशतेदलेऽमृतमहाब्धिधाराधराम् ॥ प्रणामफलदायिनींस
कलराज्यवश्याङ्गणान्नमामिपरमाम्बिकाँव्विषयपाशसंहारिणी
म् ॥ १७ ॥ साक्षादहन्त्रिभुवनेऽमृतपूर्णदेहां सन्ध्यादिदेविक
लला×कुलपण्डितेन्द्राम् ॥ तन्नोभजेसुरवरेवरकालिकेत्वांसिद्धा
नलेप्रतिदिनम्प्रणमामिभक्त्या ॥१८॥ भक्तिन्धनञ्जयपदय्यँदिदे

हिदास्यन्तस्मिन्महामधुमतीलघुगेहभाय्यांम् ॥ १९ ॥ एत त्स्तोत्रप्रसादेनकवितावाक्पतिर्भवेत् ॥ महासिद्धीश्वरोदि व्योवीरभावपरायणः ॥ २० ॥ सर्वत्रजयमाप्नोतिसहिस्याद्धर वल्लभः ॥ वाचामीशोभवेत्क्षिप्रङ्कामरूपीभवेन्नरः ॥ २१ ॥ पशुरेवमहावीरोदिव्योभवतिनिश्चितम् ॥ क्रमशोप्यष्टसिद्धिःस्या द्वाग्मीभवतिनिश्चितम् ॥२२॥ सर्व्वविद्याऽप्रसीदन्तितुष्टास्सर्व्व दिगीश्वराः ॥ वह्निःशीतलताँय्यातिजलस्तम्भंसकारयेत्॥२३॥ धनवान्पुत्रवान्राजाइहलोकेभवेन्नरः ॥ परिचरतिवैकुण्ठेकै लासेशिवसन्निधौ ॥ २४ ॥ मुक्तएवमहादेवयोनित्यंसर्व्वदापठे त् ॥ महाविद्यापदाम्भोजंसहिपश्यतिनिश्चितम् ॥ २५ ॥

इतिकुमारीस्तोत्रंसमाप्तम् ॥

अथकुमारीकवचम् ।

अथातस्सम्प्रवक्ष्यामिकुमारीकवचंशुभम्॥त्रैलोक्यमङ्गलन्ना ममहापातकनाशनम् ॥ १ ॥ पठनाद्धारणाल्लोकामहासिद्धाऽप्र भाकराः ॥ शक्रोदेवाधिपः श्रीमान्देवगुरुर्ब्बृहस्पतिः ॥ २ ॥ सम्यक्तेजोमयोवह्निर्द्धर्म्मराजोभयानकः ॥ वरुणोदेवपूज्योहिज लानामधिपस्स्वयम् ॥ ३ ॥ सर्व्वहर्त्तामहावायुऽकुमाराऽकुञ्जरे श्वरः ॥ धनाधिपऽप्रियश्शंभोस्सर्व्वेदेवादिगीश्वराः ॥ ४ ॥ त्वमे कऽप्रभुरेकात्मासर्व्वेशानिर्म्मलोदयः॥एतत्कवचपाठेनसर्व्वेभूपा धनाधिपाः ॥ ५ ॥ प्रणवोमेशिरऽपातुमायासन्ध्यात्मिकासती॥ ललाटोर्ध्वंमहामायापातुमेश्रीसरस्वती।६।कामाख्यावटुकेशानी त्रिमूर्त्तिर्भ्रूमेवतु॥चामुण्डावीजरूपाचवदनंकालिकामम॥७॥ पातुमांसूर्य्यगानित्यन्तथानेत्रद्वयम्मम॥ कर्ण्णयुग्मङ्कामबीजस्व रूपोमातपस्विनी ॥ ८ ॥ रसनाग्रन्तथापातुवाग्देवीमालिनी

मम ॥ तामवस्थाकामरूपादन्ताग्रङ्कुञ्जिकामम ॥ ९ ॥ देवी प्रणवरूपासापातुनित्यंशिरोमम ॥ ओष्ठाधरंशक्तिबीजात्मिका स्वाहास्वरूपिणी ॥ १० ॥ गलदेशम्महारौद्रीपातुमेचापरा जिता ॥ क्षौंबीजम्मेसदाकण्ठंरुद्राणीस्वाहयान्विता ॥ ११ ॥ हृदयंषोडशीविद्यापातुषोडशसुस्वरा ॥ द्वौबाहूपातुसर्व्वत्रमहाल क्ष्मीश्प्रधानिका ॥ १२ ॥ सर्व्वमन्त्रस्वरूपामेचोदरम्पीठना यिका ॥ पार्श्वयुग्मन्तथापातुहृद्देवीवाग्भवात्मिका ॥ १३ ॥ कैशोरीकटिदेशम्मेमायाबीजस्वरूपिणी ॥ जङ्घायुग्मञ्जय न्तीमे योगिनीकुल्लुकावृता ॥१४॥ सर्व्वाङ्गम्म्बिकादेवीपातुम न्त्रार्थगामिनी ॥ केशाग्रङ्कमलादेवीनासाग्रंनरमोहिनी ॥१५॥ चिबुकञ्चण्डिकादेवीकुमारीपातुमेसदा ॥ हृदयँल्ललितादेवीपृष्ठ म्पर्व्वतवासिनी ॥ १६ ॥ त्रिशक्तिःषोडशीदेवीलिङ्गङ्कुब्जंसदा वतु ॥ श्मशानेचाम्बिकादेवीगङ्गागर्भंचभैरवी ॥ १७ ॥ शू न्यागारेपञ्चमुद्रामन्त्रयन्त्रप्रकाशिनी ॥ चतुष्पथेसदापातुमामे ववज्रधारिणी ॥ १८ ॥ शवासनगताचण्डामुण्डमालाविभू षिता ॥ पातुमामेवलिङ्गेचईश्वरीशक्तिरूपिणी ॥ १९ ॥ वनेपातुमहाबालामहारण्येरणप्रिया ॥ महाजलेतडागेचशत्रुम ध्येसरस्वती ॥ २० ॥ महाकाशपथेपृथ्वीपातुमांशीतलासदा ॥ रणमध्येराजलक्ष्मीश्कुमारीकुलकामिनी ॥ २१ ॥ अर्द्धनारीश्व रीपातुममपादतलम्महो ॥ नवलक्षमहाविद्याकुमारीरूपधारि णी ॥ २२ ॥ कोटिसूर्य्यप्रतीकाशाचन्द्रकोटिसुशीतला ॥ पा तुमाँव्वरदावाणीवटुकेश्वरकामिनी ॥ २३ ॥ इतितेकथितन्नाथ कवचम्परमाद्भुतम् ॥ कुमार्य्याश्कुलदायिन्याश्पञ्चतत्त्वार्थपा रगम् ॥ २४ ॥ योजपेत्पञ्चतत्त्वेनस्तोत्रेणकवचेनच ॥ आका शगामिनीसिद्धिर्भवेत्तस्यनसंशयः ॥ २५ ॥ वज्रदेहीभवेत्क्षिप्र

ङ्कवचस्यप्रसादतः ॥ सर्व्वसिद्धीश्वरोयोगीज्ञानीभवतियः पठेत् ॥ ॥ २६ ॥ विवादेव्यवहारेचसङ्ग्रामेकुलमण्डले ॥ महापथेश्मशा नेचयोगसिद्धयुद्भवेनच ॥ २७ ॥ पठित्वाफलमाप्नोतिसत्यंसत्य ङ्कुलेश्वर ॥ वशीकरणकवचंसर्व्वत्रजयदंशुभम् ॥ २८ ॥ पुण्यत्र तीपठेन्नित्यंयँयतिश्श्रीमान्भवेद्ध्रुवम् ॥ सिद्धविद्याकुमारीचददा तिसिद्धिमुत्तमाम् ॥२९॥ पठेद्यःशृणुयाद्वापिसभवेत्कल्पपादपः॥ भुक्तिंमुक्तिंतुष्टिंपुष्टिंराजलक्ष्मींसुसम्पदम् ॥३०॥ प्राप्नोतिसाधक श्रेष्टोधारयित्वाभवेज्जयी ॥ असाध्यंसाधयेद्विद्वान्पठित्वाकवचंशु भम् ॥ ३१ ॥ कुलीनानाम्महासौख्यन्धर्म्मार्त्थकाममोक्षदम् ॥ योगिनान्दिवसेनित्यङ्कुमारीम्पूजयेन्निशि ॥ ३२ ॥ उपचारवि शेषेणत्रैलोक्यंवँशमानयेत् ॥ पललेनाशनेवापिमत्स्येनमुद्रया सह ॥ ३३ ॥ नानाभक्ष्येणभोज्येनगन्धद्रव्येणसाधकः ॥ मा ल्येनस्वर्ण्णरजतालङ्कारेणसुचैलकैः ॥ ३४ ॥ पूजयित्वाजपित्वा चतर्प्पयित्वावराननाम् ॥ यज्ञदानतपस्याभिः प्रयोगेणमहेश्वर ॥ ३५ ॥ स्तुत्वाकुमारीकवचंयः पठेदेकभावतः ॥ तस्यसिद्धि र्भवेत्क्षिप्रंराजराजेश्वरोभवेत् ॥ ३६ ॥ वाञ्छाफलमवाप्नोतिय द्यन्मनसिवर्त्तते ॥ भूर्ज्जपत्रेलिखित्वायः कवचन्धारयेद्यदि ॥ ॥ ३७ ॥ शनिमङ्गलवारेचनवम्यामष्टमीदिने॥चतुर्दश्याम्पौर्ण्ण मास्याङ्कृष्णपक्षेविशेषतः ॥ ३८ ॥ लिखित्वाधारयेद्विद्वानुत्त राभिमुखोभवेत् ॥ महापातकयुक्तोपिमुक्तस्स्यात्सर्व्वपातकैः ॥ ॥ ३९ ॥ योपिद्वामभुजेधृत्वासर्व्वकल्याणमालभेत् ॥ बहुपुत्रा न्विताकान्तासर्व्वसम्पत्तिसँयुता ॥ ४० ॥ तथाश्रीपुरुषश्रेष्टोद क्षिणेधारयेद्भुजे ॥ ऐहिकेदिव्यदेहःस्यात्पञ्चाननसमप्रभः ॥ ॥ ४१ ॥ शिवलोकेपरेयातिवायुवेगीनिरामयः ॥ सूर्य्यमण्डल माभेद्यपरम्मोक्षमवाप्नुयात् ॥ ४२ ॥ लोकानामतिसौख्यद

म्भयहरंश्रीपादभक्तिप्रदम्मोक्षार्त्थङ्कवचंशुभम्प्रपठतामानन्दसिन्धूद्भवम्॥ पन्थानङ्कलिकालघोरकलुषध्वंसैकहेतुञ्जयय्यैलोकाःप्रपठन्तिधर्म्ममतुलम्मोक्षँव्रजन्तिक्षणात् ॥ ४३ ॥ इतिरुद्रयामलेउत्तरतन्त्रेमहातन्त्रोद्दीपनेकुमार्य्युपचर्य्यविन्यासेकुमारीकवचोल्लासेसिद्धमन्त्रप्रकरणेभावनिर्ण्णयकुमारीकवचंसमाप्तम् ॥

अथान्यत्स्तोत्रम्।

जगत्पूज्ये जगद्वन्द्ये सर्व्वशक्तिस्वरूपिणी॥ पूजाङ्गृहाणकौमारिजगन्मातर्न्नमोस्तुते ॥१॥ त्रिपुरान्त्रिपुराधारान्त्रिवर्ष्पाज्ञानरूपिणीम् ॥ त्रैलोक्यवन्दितान्देवीन्त्रिमूर्तिम्पूजयाम्यहम् ॥२॥ कालात्मिकाङ्कलातीताङ्कारुण्यहृदयांशिवाम्॥ कल्याणजननीन्देवीङ्कल्याणीम्पूजयाम्यहम्॥३॥अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ॥ अनन्तशक्तिकाँल्लक्ष्मींरोहिणीम्पूजयाम्यहम् ॥ ॥ ४ ॥ कामचारींशुभाङ्कान्ताङ्कालचक्रस्वरूपिणीम् ॥ कामदाकरुणोदाराङ्कालिकाम्पूजयाम्यहम् ॥ ५ ॥ चण्डवीराञ्चण्डमायाञ्चण्डमुण्डप्रभञ्जनीम् ॥ पूजयामिसदादेवीञ्चण्डिकाञ्चण्डविक्रमाम् ॥ ६ ॥ सदानन्दकरींशान्तांसर्व्वदेवनमस्कृताम् ॥ सर्व्वभूतात्मिकाँल्लक्ष्मीं शाम्भवीम्पूजयाम्यहम् ॥ ७ ॥ दुर्ग्गमेदुस्तरेकार्य्ये भवदुःखनिवासिनीम् ॥ पूजयामिसदाभक्त्यादुर्ग्गां दुर्ग्गार्त्तिनाशिनीम् ॥ ८ ॥ सुन्दरींसर्व्ववर्ण्णाभांसुखसौभाग्यदायिनीम् ॥ सुभद्राजननीन्देवीं सुभद्राम्पूजयाम्यहम् ॥ ९ ॥

इतिकुमारीस्तोत्रम्।

इति शाक्तप्रमोदे कुमारीतन्त्रं समाप्तम्।